Dayananda Stava

# दयानन्दस्तवः

## Document Information

Text title : Dayananda Stava

File name : dayAnandastavaH.itx

Category : misc, sanskritgeet, gurudev

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# दयानन्दस्तवः

(गीतिका) (प्रमाणिका वृत्तम्)

नमामि मूलशङ्करं दयाऽऽकरं गुणाऽऽकरम् ।
प्रभाऽऽकरं सुधाऽऽकरं समस्त-लोक-भास्करम् ॥ नमामि० ॥ १
स्व-ज्ञान-दीप्ति-भास्वरं गुण-प्रभा-विकस्वरम् ।
स्व-योग-रोचिषाऽऽवृतं तपो-विधृतं-कल्मषम् ॥ नमामि० ॥ २
महर्षि-वृन्द-वन्दितं श्रुतेर्निनाद-नन्दितम् ।
अनाथ-नाथमाश्रयं सदा सदार्य-संश्रयम् ॥ नमामि० ॥ ३
भजे गुणैक मानिनं श्रुति-प्रभैक-ध्यायिनम् ।
भवाब्धि-दोष-पायिनं सुखौघ-शान्ति-दायिनम् ॥ नमामि० ॥ ४
तमोऽपहं रजोऽपहं अजस्रमात्म-दोष-हम् ।
तप-प्रपूत-मानसं अनार्य-वृन्द-शासनम् ॥ नमामि० ॥ ५
श्रये गुणोच्चयाऽऽश्रयं मनोज-भाव-संश्रयम् ।
भवाऽब्धि-दुःख-वारकं अशेष-दोष-हारकम् ॥ नमामि० ॥ ६
श्रुति-स्मृति-प्रचारकं सदाऽऽर्य-वर्त्म धारकम् ।
दरिद्र-दीन-तारकं गुण-प्रभा-प्रसारकम् ॥ नमामि० ॥ ७
त्वदङ्घ्रि-पद्म-सेवनं समस्त-शोक-शोषणम् ।
अशेष-दोष-दूषणं सुखौध सिन्धु पोषणम् ॥ नमामि० ॥ ८
गुणाऽश्रयं प्रभाऽऽश्रयं समस्त-गौरवाऽऽश्रयम् ।
परार्थ-त्यक्त-विग्रहं त्विषा-प्रदीप्त-विग्रहम् ॥ नमामि० ॥ ९
नमामि लोक-लोचनं स्फुरत्प्रभा-प्ररोचनम् ।
सुधी-प्रवीर-रञ्जकं समस्त-दोष-भञ्जकम् ॥ नमामि० ॥ १०

इति दयानन्दस्तवः सम्पूर्णः ।

Proofread by Mandar Mali

*Dayananda Stava*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*